# .. Shri Bhairavi aShTottarashatanAmastotram ..

# ॥ श्रीभैरव्यष्टोत्तरशतनामस्तोत्रम् ॥

## Sanskrit Document Information

Text title : bhairavI AshTottarasharanamastotra

File name : bhairavyaShTottarashatanAmastotra.itx

Category : aShTottarashatanAma

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay

Latest update : October 15, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 8, 2017

*sanskritdocuments.org*

# ॥ श्रीभैरव्यष्टोत्तरशतनामस्तोत्रम् ॥

अथवा श्रीत्रिपुरभैरवी अष्टोत्तरशतनामस्तोत्रम्

॥ श्रीगणेशाय नमः ॥

॥ श्रीउमामहेश्वराभ्यां नमः ॥

॥ अथ भैरव्यष्टोत्तरशतनामस्तोत्रप्रारंभः ॥

श्रीदेव्युवाच ।

कैलासवासिन्भगवन्प्राणेश्वर कृपानिधे ।
भक्तवत्सल भैरव्या नाम्नामष्टोत्तरं शतम् ॥ १॥

न श्रुतं देवदेवेश वद मां दीनवत्सल ।

श्रीशिव उवाच ।

शृणु प्रिये महागोप्यं नाम्नामष्टोत्तरं शतम् ॥ २॥

भैरव्याः शुभदं सेव्यं सर्वसम्पत्प्रदायकम् ।
यस्यानुष्ठानमात्रेण किं न सिद्ध्यति भूतले ॥ ३॥

ॐ भैरवी भैरवाराध्या भूतिदा भूतभावना ।
कार्य्या ब्राह्मी कामधेनुः सर्वसम्पत्प्रदायिनी ॥ ४॥

त्रैलोक्यवन्दिता देवी महिषासुरमर्द्दिनी ।
मोहघ्नी मालतीमाला महापातकनाशिनी ॥ ५॥

क्रोधिनी क्रोधनिलया क्रोधरक्तेक्षणा कुहूः ।
त्रिपुरा त्रिपुराधारा त्रिनेत्रा भीमभैरवी ॥ ६॥

देवकी देवमाता च देवदुष्टविनाशिनी ।
दामोदरप्रिया दीर्घा दुर्गा दुर्गतिनाशिनी ॥ ७॥

लम्बोदरी लम्बकर्णा प्रलम्बितपयोधरा ।
प्रत्यङ्गिरा प्रतिपदा प्रणतक्लेशनाशिनी ॥ ८॥

प्रभावती गुणवती गणमाता गुहेश्वरी ।
क्षीराब्धितनया क्षेम्या जगत्त्राणविधायिनी ॥ ९॥

महामारी महामोहा महाक्रोधा महानदी ।
महापातकसंहर्त्री महामोहप्रदायिनी ॥ १०॥

विकराला महाकाला कालरूपा कलावती ।
कपालखट्वाङ्गधरा खड्गखर्प्परधारिणी ॥ ११॥

कुमारी कुङ्कुमप्रीता कुङ्कुमारुणरञ्जिता ।
कौमोदकी कुमुदिनी कीर्त्त्या कीर्त्तिप्रदायिनी ॥ १२॥

नवीना नीरदा नित्या नन्दिकेश्वरपालिनी ।
घर्घरा घर्घरारावा घोरा घोरस्वरूपिणी ॥ १३॥

कलिघ्नी कलिधर्मघ्नी कलिकौतुकनाशिनी ।
किशोरी केशवप्रीता क्लेशसङ्घनिवारिणी ॥ १४॥

महोत्तमा महामत्ता महाविद्या महीमयी ।
महायज्ञा महावाणी महामन्दरधारिणी ॥ १५॥

मोक्षदा मोहदा मोहा भुक्तिमुक्तिप्रदायिनी ।
अट्टाट्टहासनिरता कङ्कणन्नूपुरधारिणी ॥ १६॥

दीर्घदंष्ट्रा दीर्घमुखी दीर्घघोणा च दीर्घिका ।
दनुजान्तकरी दुष्टा दुःखदारिद्र्यभञ्जिनी ॥ १७॥

दुराचारा च दोषघ्नी दमपत्नी दयापरा ।
मनोभवा मनुमयी मनुवंशप्रवर्द्धिनी ॥ १८॥

श्यामा श्यामतनुः शोभा सौम्या शम्भुविलासिनी ।
इति ते कथितं दिव्यं नाम्नामष्टोत्तरं शतम् ॥ १९॥

भैरव्या देवदेवेश्यास्तव प्रीत्यै सुरेश्वरि ।
अप्रकाश्यमिदं गोप्यं पठनीयं प्रयत्नतः ॥ २०॥

देवीं ध्यात्वा सुरां पीत्वा मकारपञ्चकैः प्रिये ।
पूजयेत्सततं भक्त्या पठेत्स्तोत्रमिदं शुभम् ॥ २१॥

षण्मासाभ्यंतरे सोऽपि गणनाथसमो भवेत् ।
किमत्र बहुनोक्तेन त्वदग्रे प्राणवल्लभे ॥ २२ ॥

सर्वं जानासि सर्वज्ञे पुनर्मां परिपृच्छसि ।

न देयं परशिष्येभ्यो निन्दकेभ्यो विशेषतः ॥ २३॥

॥ इति श्रीभैरव्यष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

.. Shri Bhairavi aShTottarashatanAmastotram ..
was typeset using XƎLATEX 0.99996
on May 8, 2017

Please send corrections to *sanskrit@cheerful.com*